योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः १२०

अज्ञातलेखकः

विंशाधिकशततमः सर्गः १२०

सहचरा ऊचुः ।

एवंप्रायाः कथाः कुर्वत्पश्यैनन्मिथुनं महत् ।

पानं प्रवृत्तवत्सारं पातुं पद्मनिभेक्षण ।। १

कदलीकन्दलीस्वच्छगुच्छाच्छोटनपण्डिताः ।

विविधा वायवो वान्ति पुष्पकेसरमण्डिताः ।। २

वान्ति वाता वनोद्भ्रान्तविविधामोदमांसलाः ।

पीतघर्मकणाः क्रान्तललनालकलालकाः ।। ३

कुलाचलगुहागेहवलनोद्यन्मृगाधिपाः ।

सरन्त्यसुरसंरम्भैर्लवणार्णवमारुताः ।। ४

तमालतालतरलीलान्दोलनलालिताः ।

अनिलाजलकल्लोलोत्क्रान्तकोमलपल्लवाः ।। ५

ललन्नवलतावान्तपुष्पधूलिविधूसराः ।

सरन्ति मरुतो मन्दमुद्यानेषु नृपा इव ।। ६

मधुरं वंशविश्रान्तो गातुमेष वनानिलः ।

प्रवृत्तः पाण्डुनगरनारीभिरिव शिक्षितः ।। ७

निकारः कर्णिकारेण पवनस्य यदा कृतः ।

तदा परिहरन्त्येनं भ्रमरा अपि दूरतः ।। ८

न ददाति फलं किंचिदर्थिने न च पल्लवम् ।

तालः स्तम्भतयाऽऽरम्भं ह्यरूपैव विनाऽऽकृतिः ।। ९

राग एव हि शोभायै निर्गुणानां जडात्मनाम् ।

राजेव राजते राजन्रागेणैवैष किंशुकः ।। १०

आगच्छ कर्णिकारोऽयं विकारस्यैव भाजनम् ।

निरामोदः किमेतेन निर्गुणेनेव जन्तुना ।। ११

विलोलमञ्जरीजालतडित्सङ्गस्थितोऽसितः ।

चातकस्याम्बुदभ्रान्तिं तमालः कुरुते मुधा ।। १२

पत्राला घनसंघाताः सच्छायावृतभूभृतः ।

गुणानां महतां योग्या वंशा वंशा इवोन्नताः ।। १३

हेमसान्वासनस्थोऽग्र्यो वातव्याधितटोऽम्बुदः ।

तडित्पीताम्बरं धत्ते क्षुब्धं हरिरिवोद्भवः ।। १४

प्रवेशनिर्गमव्यग्रतरत्खगशिलीमुखः ।

प्रफुल्लकिंशुको भाति वीरो रक्त इवासृजा ।। १५

मन्दारमञ्जरीपुञ्जपिञ्जराम्भोदमन्दिरे ।

महेन्द्रमस्तके मत्ताः सुप्ता गन्धर्वकामिनः ।। १६

कल्पद्रुमवनच्छाया विश्रान्ता विततान्विताः ।

पश्य पार्थिव गायन्ति सिद्धविद्याधराध्वगाः ।। १७

पश्य कल्पद्रुमस्यास्य पल्लवे पल्लवे वने ।

विश्रान्ताः सुरसुन्दर्यो गायन्ति च हसन्ति च ।। १८

मन्दिरं मन्दपालस्य मन्दरे मृदुमन्दिरे ।

मुनेरिदमुदारस्य भार्या सा यस्य पक्षिणी ।। १९

अन्योन्यामतसिंहेभनकुलोरगकेलिकाम् ।

पश्य मुन्याश्रमश्रेणिं सर्वर्तुकुसुमद्रुमाम् ।। २०

विद्रुमद्रुममिश्राणामम्भोधितटवीरुधाम् ।

बिम्बितार्काः कचन्त्येते पल्लवेषूदबिन्दवः ।। २१

वीचयो रत्नमाणिक्यपदेष्वावर्तवृत्तिभिः ।

विलसन्ति विलासिन्यो वक्षःस्विव विलासिनाम् ।। २२

नागलोकेन्द्रलोकस्त्रीगमनागमनोद्भवः ।

दिव्यो भूषणझांकारः श्रूयते नभसः शृणु ।। २३

श्रवणोपान्तविभ्रष्टमदमत्तालिनीस्वरैः ।

ऐरावणस्नानभुवो गायन्तीव गुहा गिरेः ।। २४

ह्रसतोऽनुदिनं कृष्णपक्षे कृष्णान्तलेखिकाः ।

दृश्यन्ते कृशगात्रस्य वास्तुकावलयोऽम्बुधेः ।। २५

आमोदगन्धश्वसना सच्छाया शीतलाङ्गिका ।

एकान्तदर्शिताकारा नानाकुसुमपूरिता ।। २६

वनविन्यासवसना निर्झरामलहासिनी ।

आस्तीर्णपुष्पास्तरणा धन्या वनविलासिनी ।। २७

रमन्ते नन्दनोद्याने न तथोदारबुद्धयः ।

यथोपशान्तशब्दासु शुद्धासु वनभूमिषु ।। २८

सुविरक्तं मुनेश्चेतो रक्तं च विषयार्थिनः ।

रमयन्ति समं रम्या विजना वनभूमयः ।। २९

सलिलाधौतवप्राणामम्भोधितटभूभृताम् ।

नूपुरैरिव रत्नौघैः पादा भान्ति ध्वनन्ति च ।। ३०

पुंनागनगविश्रान्ताः कान्तकाञ्चनकान्तयः ।

हेमचूडाः खगा भान्ति दिवि देवगणा इव ।। ३१

भ्रमराम्भोदधूमाढ्याः फुल्लचम्पककाननाः ।

कम्पन्ते पश्य वातेन ज्वलिता इव पर्वताः ।। ३२

कुर्वन्तं करवीराग्रलतान्दोलावदोलकम् ।

कोकिलं कोकिलालिङ्ग्य लोलालापयति प्रियम् ।। ३३

लसत्कलकलारावमेता लावणसैन्धवीः ।

पूर्णास्तटभुवो भूपैः पश्योपायनपाणिभिः ।। ३४

आ पूर्वादाऽपरस्माल्लवणजलनिधेरोत्तराद्दक्षिणाद्वा

देवोदग्राजिशिष्टा इह नरपतयः पादपीठीक्रियन्तां

दीयन्तां मण्डलानां दिशि दिशि च यथाशास्त्रमस्त्रा-

ण्यवन्या

रक्षायै क्षान्तिपूर्वं चिरमतुलबलं शान्तया शास-

नानि ।। ३५

इत्यार्षे श्रीवासि० वा० दे० मो० निर्वा० अविद्यो० विप० दिगन्तरवृत्तिवाय्वादिवर्णनं नाम विंशत्यधिकशततमः सर्गः

।। १२० ।।